## अध्याय :- ६४ Chapter-64 

सूत उवाच[१] ।।
एवं तत्र स्थिते तीरे देव्याराधन तत्परे ।।
सप्त लिंगार्चनरते भीमनन्दन नन्दने ।। १

ततः कालेन केनापि पांडवा द्यूतनिर्जिताः ।।
तत्राजग्मुश्च क्रमतस्तीर्थ स्नानकृते भुवम् ।। २

प्रागेव चंडिकां देवीं क्षेत्रा दीशानतः स्थिताम्[२] ।।
आसेदुर्मार्गे खिन्नास्ते द्रौपदीपं च मास्तदा ।। ३

तत्रैव चोपविष्टो भूत्तदानीं चंडिका गणः ।।
बर्बरीकश्च तान्वीरान्समायातान पश्यत ।। ४

परं नासौ वेद पाण्डून्पांडवास्तं च नो विदुः ।।
आजन्म[३] यस्मान्नैवा भूत्पाण्डूनां चास्य संगमः ।। ५

ततः प्रविश्य प्रविश्य वै तस्मिन्देवीमासाद्य पांडवाः ।।
पिंडकार्य तत्र मुक्तवा तृषा प्रेक्षिजलं तदा ।। ६

ततो भीमः कुण्डमध्यं जलं पातुं विवेश ह ।।
प्रविशंतं च तं प्राह युधिष्ठिर इदं वचः ।। ७

---

१ अ. प्रती 'उवाच' नास्ति ।।
२ ब. स्थितः
३ अ. आजगृम

उद्धृत्य भीम तोयं त्व पादौ प्रक्षाल्य भो बहिः ।।
ततः पिबा्न्यथा दोषो महांस्त्वामुप पत्यस्ते ।। ८

एतद्राज्ञो वचो भीमस्तृषा व्याकुल लोचनः ।।
अश्रुत्वैव विवेशासौ कुंडमध्यं जलेच्छया ।। ९

स च दृष्ट्वा जलं पातुं तत्रैव कृत निश्चयः ।।
मुखं[1] हस्तौ च चरणौ क्षालयामास शुद्धये[2] ।। १०

यतः पीतं जलं पुंसामप्रक्षाल्य च यद् भवेत् ।।
प्रेताः[3] पिशाचास्तद्रूपं संक्रम्य प्रपिबंति तत् ।। ११

एवं प्रक्षालयाने च पादौ तत्र वृकोदरे ।।
उपरिस्थस्तदा प्राह सत्यं सुत्ददयो वचः ।। १२

दुर्मते भोः किमेतत्वं कुरुषे पाप निश्चयः ।।
देवी कुंडे क्षालयसि मुखं पादौ करौ च यत् ।। १३

यतो देवी सदानेन जलेन स्नाप्यते मया ।।
तदत्र प्रक्षिपंस्तोयं मलपापान्न बिभ्यसि ।। १४

---

१ अ. च हस्तौ
२ अ. सिद्धाय ।।
३ ब. प्रेता

मलाक्ततोयं यन्नाम अस्पृश्यं तन्नरैरपि ॥
कुतो देवैश्च तत्पापं स्पृश्यते तत्वतो वद ॥ १५

[1]शीघ्रं च त्वं निः सरास्मात्कुंडाद्भूत्वा बहिः पिब ॥
यथेवं पाप मूढो/सि तीर्थेषु भ्रमसे कुतः ॥ १६

भीम उवाच ॥[2]
किमेतद्भाषसे क्रूर परुषं राक्षसाधम ॥
यतस्तोयानि जंतूनामुपभोगार्थ मेव हि ॥ १७

तीर्थेषु कार्यं स्नानं चेत्युक्तं मुनिवरैरपि ॥
अंगप्रक्षालनं स्नानमुक्तं मां निंद से कुतः ॥ १८

यदि न क्रियते पानमंग प्रक्षालनं तथा ॥
*3 तत्किमर्थं पूर्तधर्माः क्रियन्ते धर्मशालिभिः ॥ १९

सुत्ददय उवाच ॥
स्नातव्यं तीर्थमुख्येषु सत्यमेतन्न संशयः ॥
चरेषु किं तु संशिय स्थावरेषु बहिः स्थितः ॥ २०

स्थावरेष्वपि संविश्य तन्नं स्नानं विधीयते ॥
न यत्र देवस्नानार्थं भक्तैः संगृह्यते जलम् ॥ २१

---

1 ब. शीघ्रतं
2 अ. भीमोवाच ॥
*3 In the M.S.S.-A Foilio No.350 to 351 2 (Two) are missing.
(Slokas from 19 to 64 are missing)

यच्च[1] हस्तशतादूर्ध्वं सरस्तत्र विधीयते ।।
संविशेऽपि क्रमश्चार्य पादौ प्रक्षाल्य यद् बहिः ।। २२

ततः स्नानं प्रकर्तव्यमन्यथा दोष उच्यते ।।
किं न श्रुतस्त्वया प्रोक्तः श्लोकः पद्मभुवा पुरा ।। २३

मलं मूत्रं पुरीषं च श्लेष्म निष्ठीनाश्रु च ।।
गंडूषाश्चैव मुंचति ये ते ब्रह्महणैः समाः ।। २४

तस्मान्निः सर शीघ्रं त्वं यथैवमजितेन्द्रियः ।।
तत्किमर्थं दुराचार तीर्थष्वटसि बालिश ।। २५

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।।
निर्विकाराः क्रियाः सर्वाः स हि तीर्थफलं लभेत् ।। २६

भीम उवाच ।।
अधर्मा वापि धर्मोऽस्तु निर्गंतुं नैव शक्नुयाम् ।।
इ क्षुधा तृषा ममा नित्यं वारितुं नैव शक्यते ।। २७

सुत्ददय उवाच ।।[2]
जीवितार्थं भवान्कस्मात्पापं प्रकुरुते वदे ।।
किं न श्रुतस्त्वया श्लोकः शिबिना यः समीरितः ।। २८

---

१ ब. यस्य
२ ब. सहृदय उ० ।।

मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ।।
न कल्पमपि जीवेत लोकद्वय विरोधिना ।।

भीम उवाच ।।
काकस्वरेण[1] ते मह्यं कर्णौ[2] बधिरतां गतौ ।।
पास्याम्येव जलं चात्र कामं विलप शुष्य वा ।। ३०

सुत्ददय उवाच ।।[3]
क्षत्रियाणां कुले जातस्त्वहं धर्माभिरक्षिणाम् ।।
तस्माते पातकं कर्तुं न दास्यामि कथंचन ।। ३१

तद्वाराकाथ शीघ्रं त्वमस्मात्कुंडाद्विनिः सर ।। ३२

इष्टाकाशकलैः शीघ्रं चूर्णयिष्ये न्यथा शिरः ।।
इत्युक्तवा चेष्टकां गृह्य मुमोच शिरसः प्रति ।। ३३

भीमश्च वंचयित्वा तामुत्प्लुत्य बहिराव्रजत् ।।
भर्त्सयंतौ ततश्चौ भावन्योन्यं भीम विक्रमौ ।। ३४

युयुधाते प्रलंबाभ्यां बाहुभ्यां युद्ध पारगौ ।।
व्यूढोरस्कौ दीर्घ भुजौ नियुद्ध कुशलावुभौ ।। ३५

---

१ ब. रा
२ ब. कर्णौ
३ ब. सुहृदय उ० ।।

मुष्टिभिः पार्ष्णिघातैश्च जानुभिश्चाऽभिजघ्नतुः ।।
ततो मुहूर्तात्कौरव्यः पर्यहीयत पांडवः ।। ३६

हीयमानस्ततो भीम उद्यतोऽभूत्पुनः पुनः ।।
अहीयत ततोऽप्यंग ववृधे बर्बरीककः ।। ३७

ततो भीमं समुत्पाट्य बर्बरीको बलादिव[1] ।।
निष्पपेष ततः क्रुद्धस्तदद्भुत मिवा भवत् ।। ३८

मूर्छितं चैवमादाय विस्फुरन्तं पुनः पुनः ।।
सागराय प्रचलितः क्षेप्तुं[2] तत्र महाम्भसि ।। ३९

ददृशुः पांडवानैतदेव्या नयनयंत्रिताः ।। ४०

तथा गृहीते कुरुवीर मुख्ये वीरेण तेनाद्भुत विक्रमेण ।।
आश्चर्य मासीदिवि देवतानां देवीभिराकाश तले निरीक्ष्य तम् ।। ४१

सागरस्य ततस्तीरे बर्बरीकं गतं तदा ।।
निरीक्ष्य भगवान्रुद्रो[3] वियत्स्थः सम भाषत ।। ४२

---

१ ब. वा
२ ब. क्षेप्तुत
३ ब. भगवान् रुद्रो

भो भो राक्षस शार्दुल बर्बरीक महाबल ।।
मुंचैनं भरतश्रेष्ठं भीमं तव पितामहम् ।। ४३

अयं हि तीर्थयात्रायां विचरन्भ्रातृभिर्युतः ।।
कृष्णाया चाप्यदस्तीर्थं स्नातुमेवाभ्युपाययौ ।। ४४

सन्मानं सर्वथा तस्मादर्हः कौरव नंदनः ।।
अपापो वा सपापो वा पूज्य एव पितामहः[१] ।। ४५

सूत उवाच ।।
इति रुद्रवचः श्रुत्वा सहसा तं विमुच्य सः ।।
न्यपतत्पादयोर्हा धिक्कष्टं कष्टं च प्राह सः ।। ४६

क्षम्यतां क्षम्यतां चेति पुनः पुनरवोचत ।।
शिरश्च ताडयन्स्वीयं रुरोद च मुहुर्मुहः ।। ४७

[२]तं तथा परिशोचंतं मुह्यमानं मुहुर्मुहः ।।
भीमसेनः समालिंग्य आघ्राय च वचोऽब्रवीत् ।। ४८

वयं त्वां नैव जानीमस्त्वं चास्मांजन्मकालतः ।।
अत्र वासश्च ते पुत्र भैमिः कृष्णाच्च संश्रुतः ।। ४९

---

१ ब. ह
२ ब. त तथा

परं नो विस्मृतं सर्वं नानादुःखैः प्रमुह्यताम् ।।
दुःखितानां यतः सर्वा स्मृतिर्लुप्ता भवेत्स्फुटम् ।। ५०

तदस्माकमिदं दुःखं सर्वकाल विधानतः ।।
मा शोचस्त्वं च तनय न ते दोषो ऽस्ति चाण्वपि ।। ५१

यतः सर्वः क्षत्रियस्य दंडयो विपथि संस्थितः ।।
आत्मापिदंडयः साधूनां प्रवृत्तः[1] कुपथाद्यदि ।। ५२

पितृमातृसुतत्वद्भ्रातृ पुत्रादीनां किमुच्यते ।।
अतीव मम हर्षो ऽयं धन्योहं पूर्वजाश्च मे ।। ५३

यस्य त्वीदशकः पौत्रो[2] धर्मज्ञो धर्मपालकः ।।
वरार्हस्त्वं प्रशंसार्हो च भवान्धेषां सतां तथा ।। ५४

तस्माच्छोकं विहायेमं स्वस्थो भवितुमर्हसि ।। ५५

बर्बरीक उवाच ।।
पापं मां तातताततत्वं ब्रह्मघ्नादपि कुत्सितम् ।।
अप्रशस्यं नार्हसीह द्रष्टुं स्पष्टमपि प्रभो ।। ५६

---

१ ब. प्रवृत्त
२ ब. पुत्रो

सर्वेषामेव पापानां निष्कृतिः[1] प्रोच्यते बुधैः ।।
पित्रोरभक्तस्य पुनर्निष्कृतिर्नैव विद्यते ।। ५७

तथैन देहेन मया तातताता ऽभिपीडितः ।।
तत्स्वमेव समुत्प्रक्षाये महीसागरसंगमे ।। ५८

मैत्र्ये भवेयमन्येषु अपि जन्मसु पातकी ।।
न मामस्माद भिप्रायादर्हः को ऽपि निवर्तितुम् ।। ५९

यतो ऽशेन विलुप्येत प्रायश्चित्तान्निवारकः ।।
एवमुक्तवा समुत्प्लुत्य ययौ चैवार्णवं बली ।। ६०

समुद्रो ऽपि चकंपे च कथमेनं निहन्म्यहम् ।।
ततः सिद्धांबिका याश्च देव्यस्तत्र चतुर्दश ।। ६१

समालिंग्य च संस्थाप्य रुद्रेण सहिता जगुः ।।
अज्ञातविहिते पापे नास्ति वीरेन्द्र कल्मषम् ।। ६२

शास्त्रेषूक्तमिदं वाक्यं[2] नान्यथा कर्तुमर्हसि ।।
अमुं च पृष्ठलग्नं त्वं पश्य[3] भोः स्वं पितामहम् ।। ६३

---

१ ब. ति
२ ब. वाक्य
३ ब. भो स्व पितामह ।।

पुत्र पुत्रेति भाषंतमनु त्वा मरणोन्मुखम् ।।
अधुना चेत्स्वकं देहं वीरत्वं परत्यक्ष्यसि ।। ६४

ततस्त्यक्ष्यति भीमोऽपि पातकं तन्महत्तव ।।
एवं ज्ञात्वा धारय त्वं स्वशरीरं महामते ।। ६५

अथ चेत्यक्तुकामस्त्वं तत्रापि वचनं शृणु ।।
स्वल्पेनैव च कालेन कृष्णादेवकिनंदनात् ।। ६६

देहपातस्तव प्रोक्तस्तं प्रतीक्षयदीच्छसि ।।
यतो विष्णुकराद्वत्स देहपातो विशिष्यते ।। ६७

तस्मात्प्रतीक्ष तं कालमस्माकं प्रार्थितेन च ।।
एवमुक्तो निववृत्ते बर्बरीकोऽपि दुर्मनाः ।। ६८

[1]रुद्रं देवीश्च चामुंडां सोपालंभं वचोऽब्रवीत् ।।
त्वमेव देवि[2] जानासि रक्ष्यते शार्ङ्ग धन्विना ।। ६९

पांडवा भूमिलोभार्थं तते कस्मादुपेक्षितम् ।।
त्वया च समुपागत्य रक्षितोऽयं वृकोदरः ।। ७०

---

१ अ. रुद्रस्य
ब. रुद्र देवस्य
२ ब. देवी

देव्युवाच ।।[१]

अहं च रक्षयिष्यामि स्वभक्तं कृष्ण मृत्युतः ।।
यस्माच्च चंडिकाकृत्यै कृतोऽनेन महारणः ।।
तस्माच्चंडिलनाम्नायं विश्वपूज्यो भविष्यति ।। ७१

एवमुक्त्वा गतः सर्वे देवा देव्यस्त्वदश्यताम् ।।
[२]भीमोऽपि तं समादाय पांडुभ्यः[३] सर्वमूचिवान् ।। ७२

विस्मिताः पांडवास्तं च पूजयित्वा पुनः पुनः ।।
यथोक्त विधिना चक्रुस्तीर्थ स्नानमतं द्रिताः ।। ७३

भीमोपि यत्र रुद्रेण मोक्षितस्तत्र सुप्रभम् ।।
लिंगं संस्थापयामास भीमेश्वरमिति श्रुतम् ।। ७४

ज्येष्ठमासे कृष्णपक्षे चतुर्दश्यामुपोषितः ।।
रात्रौ संपूज्य भीमेशं जन्मपापाद्विमुच्यते ।। ७५

यथैव लिंगानि सुपूजितानि सप्तात्र मुख्यानि महाफलानि ।।
भीमेश्वरं लिंगमिदं तथैव समस्तपापाहरं सुपूज्यम् ।। ७६

*४ इति श्री स्कांदे.... भीमेश्वर माहात्म्य वर्णनंनाम चतुःषष्टितमोऽध्यायः।।

---

१ अ. ब. हस्तप्रक्षिप्तयोः इत्ययं पाठः नास्ति ।

२ ब. भीमोपितं

३ ब. पांडवः

*४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे भीमेश्वर माहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे भीमेश्वर माहात्म्यं पंचषष्टितमोऽध्यायः।।